# Shivabhaktyartha Prarthana

# શિવભક્ત્યાર્થ પ્રાર્થના

## Document Information

Text title : Shivabhaktyartha Prarthana

File name : shivabhaktyArthaprArthanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 21| 20-26 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# Shivabhaktyartha Prarthana

## શિવભક્ત્યાર્થ પ્રાર્થના

ભોગાઙ્ગાનિ વિનશ્વરાણિ ભગવન્ પ્રાજ્યાનિ રાજ્યાન્યપિ
શ્રીમૃત્યુઞ્જય સર્વથાપિ નિધયઃ સાપાયશઙ્કાશ્રયાઃ ।
શઙ્કાતઙ્કનિવારકં નિરધિકં કાલાન્તકં કેવલં
ત્વાં મન્યે તત એવ સા ત્વયિ સદા ભક્તિમમાસ્તુ સ્થિરા ॥ ૧॥

ગોક્ષીરે મધુશર્કરાદિમધુરદ્રવ્યેષુ જિહ્વા યથા
લોલા તદ્વદુમાપતે શિવમહાદેવેતિ નામામૃતે ।
લીલા સન્તતમસ્તુ ચિત્તમપિ મે ત્વત્પાદપદ્મે મુદા
ભૃઙ્ગત્વં સમુપેત્ય તિષ્ટતુ વરઃ સોઽયં વરાણાં વરઃ ॥ ૨॥

પ્રાપ્ય પ્રોષિતભર્તૃકેવ રમણં ભાજુ યથા પદ્મિની
શીતાં કુમુદં સુધામિવ નરો રાજ્યાનિ રાજાધમઃ ।
સુશ્રોત્રં બધિરોઽન્ધકઃ સુનયનં પઙ્ગુઃ પદક્ષેપણં
વાણીં મૂક ઇવાન્તકાન્તક પદં પુષ્ટં પ્રહૃષ્ટં પુનઃ ॥ ૩॥

પ્રાપ્યેવોષરભૂતલે જલમતિશ્રાન્તો વસન્તં પિકો
વન્ધ્યા પુત્રમઘક્ષયં મુનિજનશ્ચન્દ્રં ચકેરાઙ્ગના ।
મેઘં ચાતકબાલકઃ શિવપુરીં વિશ્વેશ્વરારાધકઃ
પ્રાપ્યાનન્દમમન્દમિન્દુમુકુટં મન્માનસં લાલસમ્ ॥ ૪॥

મચ્ચિત્તં મકરન્દપાનનિરતો ભૃઙ્ગો મરન્દં યથા
કામી સુન્દરકામિનીમિવ ધનં નિઃસ્વોઃ યથા બાલકઃ ।
સ્તન્યં મેઘમિવાઙ્કુરઃ શિવ તથા ત્વન્નામસઙ્કીતનં
લબ્ધ્વા તુષ્યતુ પુષ્ટમસ્તુ સતતં યાચે ન ચાન્યાન્ વરાન્ ॥ ૫॥

શમ્ભો ત્વચ્ચરણારવિન્દમધુના દષ્ટં પુનર્મે કદા
દેયં દશનમિન્દુશેખર દયાસિન્ધો યદા નેક્ષિતમ્ ।
ત્વત્પાદામ્બુજમાદરેણ ન તદા ગ્રાહ્યં જલં વા કથં
મામાજ્ઞાપય દર્શનાય ભગવન્ સાયં પ્રગે વા પ્રભો ॥ ૬॥

એતસ્માદધિકો વરદ મે નાપેક્ષિતઃ સર્વથા
    શર્વોઽયં શપથઃ શિવાચરણયોઃ ત્વત્પાદપદ્મેઽપિ મે ।
અન્યત્ કિં મદપેક્ષિતં શિવપદામ્ભોજે ભજે સન્તતં
    તન્માત્ર મદપેક્ષિતં હૃદયમપ્યત્રાન્વહં સાદરમ્ ॥ ૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવભક્ત્યાર્થ પ્રાર્થના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૧। ૨૦-૨૬ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 21. 20-26 ..

Proofread by Ruma Dewan

*Shivabhaktyartha Prarthana*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*